শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে দ্বিতীযং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে দ্বিতীযং দশকম্ ॥

## ভগৱদ্রূপৱর্ণনম্

সূর্যস্পর্ধিকিরীটমূর্ধ্ৱতিলকপ্রোদ্ভাসিফালান্তরং
কারুণ্যাকুলনেত্রমার্দ্রহসিতোল্লাসং সুনাসাপুটম্।
গণ্ডোদ্যন্মকরাভকুণ্ডলযুগং কণ্ঠোজ্জ্ৱলৎকৌস্তুভং
ৎৱদ্রূপং ৱনমাল্যহারপটলশ্রীৱৎসদীপ্রং ভজে॥ **2.1** ॥

কেযূরাঙ্গদকঙ্কণোত্তমমহারত্নাঙ্গুলীযাঙ্কিত -
শ্রীমদ্বাহুচতুষ্কসঙ্গতগদাশঙ্খারিপঙ্কেরুহাম্।
কাঞ্চিৎ কাঞ্চনকাঞ্চিলাঞ্ছিতলসৎপীতাম্বরালম্বিনী -
মালম্বে ৱিমলাম্বুজদ্যুতিপদাং মূর্তিং তৱার্তিচ্ছিদম্॥ **2.2** ॥

যত্ত্রৈলোক্যমহীযসোঽপি মহিতং সম্মোহনং মোহনাৎ
কান্তং কান্তিনিধানতোঽপি মধুরং মাধুর্যধুর্যাদপি।
সৌন্দর্যোত্তরতোঽপি সুন্দরতরং ৎৱদ্রূপমাশ্চর্যতো -
ঽপ্যাশ্চর্যং ভুৱনে ন কস্য কুতুকং পুষ্ণাতি ৱিষ্ণো ৱিভো॥ **2.3** ॥

তত্তাদৃঙ্মধুরাত্মকং তৱ ৱপুস্সম্প্রাপ্য সম্পন্মযী
সা দেৱী পরমোৎসুকা চিরতরং নাস্তে স্ৱভক্তেষ্ৱপি।
তেনাস্যা বত কষ্টমচ্যুত ৱিভো ৎৱদ্রূপমানোজ্ঞক -
প্রেমস্থৈর্যমযাদচাপলবলাচ্চাপল্যৱার্তোদভূৎ॥ **2.4** ॥

লক্ষ্মীস্তাৱকরামণীযকহৃতৈৱেযং পরেষ্ৱস্থিরে -
ত্যস্মিন্নন্যদপি প্রমাণমধুনা ৱক্ষ্যামি লক্ষ্মীপতে।

যে ৎৱদ্ধ্যানগুণানুকীর্তনরসাসক্তা হি ভক্তা জনা -
স্তেষ্ৱেষা ৱসতি স্থিরৈৱ দযিতপ্রস্তাৱদত্তাদরা ॥ **2.5** ॥

এৱম্ভূতমনোজ্ঞতানৱসুধানিষ্যন্দসন্দোহনং
ৎৱদ্রূপং পরচিদ্রসাযনমযং চেতোহরং শৃণ্ৱতাম্।
সদ্যঃ প্রেরযতে মতিং মদযতে রোমাঞ্চযত্যঙ্গকং
ৱ্যাসিঞ্চত্যপি শীতবাষ্পৱিসরৈরানন্দমূর্চ্ছোদ্ভৱৈঃ ॥ **2.6** ॥

এৱম্ভূততযা হি ভক্ত্যভিহিতো যোগঃ স যোগদ্ৱযাৎ
কর্মজ্ঞানমযাদ্ভৃশোত্তমতরো যোগীশ্ৱরৈর্গীযতে।
সৌন্দর্যৈকরসাত্মকে ৎৱযি খলু প্রেমপ্রকর্ষাত্মিকা
ভক্তির্নিশ্রমমেৱ ৱিশ্ৱপুরুষৈর্লভ্যা রমাৱল্লভ ॥ **2.7** ॥

নিষ্কামং নিযতস্ৱধর্মচরণং যৎ কর্মযোগাভিধং
তদ্দূরেত্যফলং যদৌপনিষদজ্ঞানোপলভ্যং পুনঃ।
তত্ত্ৱৱ্যক্ততযা সুদুর্গমতরং চিত্তস্য তস্মাদ্বিভো
ৎৱৎপ্রেমাত্মকভক্তিরেৱ সততং স্ৱাদীযসী শ্রেযসী ॥ **2.8** ॥

অত্যাযাসকরাণি কর্মপটলান্যাচর্য নির্যন্মলা
বোধে ভক্তিপথেঽথৱাঽপ্যুচিততামাযান্তি কিং তাৱতা।
ক্লিষ্টৱা তর্কপথে পরং তৱ ৱপুর্ব্রহ্মাখ্যমন্যে পুন -
শ্চিত্তার্দ্রৎৱমৃতে ৱিচিন্ত্য বহুভিঃ সিধ্যন্তি জন্মান্তরৈঃ ॥ **2.9** ॥

ৎৱদ্ভক্তিস্তু কথারসামৃতঝরীনির্মজ্জনেন স্ৱযং
সিদ্ধ্যন্তী ৱিমলপ্রবোধপদৱীমক্লেশতস্তন্ৱতী।
সদ্যঃ সিদ্ধিকরী জযত্যযি ৱিভো সৈৱাস্তু মে ৎৱৎপদ -
প্রেমপ্রৌঢিরসার্দ্রতা দ্রুততরং ৱাতালযাধীশ্ৱর ॥ **2.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে দ্বিতীযং দশকং সমাপ্তম্ ॥